# संस्कृत-वार्ता:

**दिनाङ्क :-20.08.2024**

**प्रात: - 06:55**

## अथ वार्ता:

**मलेशिया-प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्लां स्वीयेन मलेशियादेशीयेन समकक्षेण अनवर-इब्राहिमइत्यनेन सह वार्तां साधयिष्यति। वार्तानन्तरम् उभौ देशौ नैकेषु सहभागिताज्ञापन पत्रेषु करिष्यत: इति आशास्ति। एतदनन्तरं श्रीमोदी तस्य सम्माने मध्याह्नभोजनस्यपि आयोजनं करिष्यति। तदनु श्रीइब्राहिम: राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मेलनं करिष्यति। राष्ट्रपते: कार्यक्रमस्य अनन्तरं विदेशमन्त्रिण: डॉ. जयशंकरस्य प्रधानमन्त्रिणा इब्राहिमेन साकं चर्चा निर्धारितास्ति। अवधेयं वर्तते यत् मलेशियादेशीय: प्रधानमन्त्री एष: त्रिदिवसीयाधिकारिकयात्रायां ह्य: रात्रौ नवदिल्लीं प्रति आगतवान्। केन्द्रीय-जलशक्ति-रेलराज्यमन्त्री वी. सोमन्ना-इत्येष: विमानपत्तन-स्थानके तस्य स्वागतम् अकरोत्।

**प्रधानमन्त्री-पोलैण्डयात्रा**

प्रधानमन्त्री नरेन्द्रमोदी श्व: आरभ्य पोलैण्ड-यूक्रेनदेशयो: त्रिदिवसीययात्रायां भविष्यति। विदेशमन्त्रालयस्य सचिव: तन्मयलाल: संवाददातॄन् सूचितवान् यत् एषा एका ऐतिहासिकी यात्रा विद्यते। यतोहि भारतस्य प्रधानमन्त्री पंचचत्वारिंशत् वर्षाणाम् अनन्तरं पोलैण्डदेशं प्रति गच्छति। सचिवेन प्रख्यापितं यत् श्रीमोदी पोलैण्डदेशस्य प्रधानमन्त्रिणा डोनाल्डटस्कइत्यनेन राष्ट्रपतिना च एण्ड्रेजडूडाइत्यनेन साकं मेलनं कारिष्यति।

अनेन अग्रे निगदितं यत् प्रधानमन्त्री श्रीमोदी यूक्रेनदेशस्य राष्ट्रपतिन: वलोडिमिर-जेलेंस्की इत्यस्य निमन्त्रणे शुक्रवासरे यूक्रेनस्यापि अधिकारिक यात्रारतो भविष्यति। महत्वाधायिनी एषा यात्रा त्रिंशद्वर्षाणाम् अनन्तरं भवति।

**भारत-जापानदेशो**

भारतजापानदेशौ ह्य: नवदिल्ल्यां टू-प्लस-टू-इत्येतस्य मन्त्रिस्तरीयवार्तां विधास्यत:। रक्षामन्त्री राजनाथसिंह: विदेशमन्त्री च डॉ. एस्. जयशङ्कर: जापानदेशीयौ रक्षामन्त्री किहारा-मिनारू विदेशमन्त्री च योको-कामिकावाइत्येषा समायोक्ष्यमाणे उपवेशने भागमं स्वीकुर्वन्ति। उपवेशनावधौ रक्षामन्त्री जापानदेशस्य च रक्षामन्त्री द्विपक्षीयवार्तां करिष्यत:। एतस्मिन् उपवेशने द्विपक्षीयसहयोगस्य समीक्षाम् अथ च उभयो: देशयोर्मध्ये सम्बन्धान् इतोऽपि प्रबलीकर्तुं नवीनेषु पक्षेषु वार्ता: समनुष्ठास्यन्ते।

**जम्मू-कश्मीर:-अधिसूचना**

जम्मूकश्मीरे विधानसभानिर्वाचनस्य प्रथमचरणस्य अधिसूचना अद्य प्रख्यापयिष्यते। एतस्मिम् प्रथमे चरणे अनन्तनाग-शोपियां-कुलगाम-रामबन-किश्तवाड़-डोडा-जनपदानां चतुर्विंशति: विधानसभासनेभ्य: मतदानं भविष्यति। अस्मै चरणाय नामाङ्कनप्रपूरणस्य अन्तिमं दिनम् अगस्तमासस्य सप्तविंशति: दिनाङ्को वर्तते। प्रत्याशिनां सप्तविंशति: नामाङ्कनपत्राणाम् अनुसन्धेयकार्यम् अग्रिमे दिवसे एव भविष्यति। नामाङ्कनप्रत्यावर्तनस्य अन्तिम: दिवस: अस्य मासस्य एव त्रिंशद्दिनाङ्के अपि च

मतदानं सितम्बरमासस्य अष्टादशदिनांके भविष्यति। ध्यातव्यमस्ति यत् केन्द्रशासित-प्रदेशे विधानसभानिर्वाचनाय अन्तिमा मतदातृसूची अद्य प्रसारयिष्यते। यस्यां मतदातृणां सङख्या नवतिलक्षाधिकं वर्तते।

**केन्द्रीयवित्तमन्त्री-निर्मला सीतारामन्**

केन्द्रीयवित्तमन्त्री निर्मला-सीतारमणः ह्य: नवदिल्ल्यां आयोजितायां सभायां सार्वजनिक-क्षेत्रस्य वित्तकोषाणां कार्यप्रदर्शनस्य समीक्षां कृतवती । अस्यां सभायां वित्तीय-सेवा-विभागस्य सचिवः डॉ. विवेक-जोशी, सार्वजनिक-क्षेत्रस्य वित्तकोषाणां प्रबन्धन-निदेशकः एवं मुख्य कार्यकारी अधिकारी अथ च अन्ये वरिष्ठ-अधिकारिणः उपस्थिताः आसन् ।

**।।इति वार्ता:।।**